Register Number:

Date:

# ST. JOSEPH'S UNIVERSITY BANGALORE-27
## B.Sc. B.A. B.COM - IV SEMESTER
## SEMESTER EXAMINATION: MAY 2023
## SA 422 – SAMSKRIT

**Time- 2 hrs** **Max Marks-60**

**I. प्रदत्तप्रश्नेभ्यः समुचितम् उत्तरं चिनुत।** **12×1=12**

अ. शकुन्तलायाः सखी का?

१) प्रियंवदा २) गौतमी ३) मेनका ४) शर्मिष्ठा

आ. अभिज्ञानशाकुन्तलनाटके कति अङ्काः सन्ति?

१) त्रयम् २) पञ्च ३) सप्त ४) नव

इ. अस्तिनापुरस्य राजा कः?

१) भरतः २) दुष्यन्तः ३) कश्यपः ४) नहुषः

ई. शकुन्तलायाः माता का?

१) वासवदत्ता २) धात्री ३) गौतमी ४) मेनका

उ. संस्कृतं विहाय नाटके का भाषा प्रयुक्ता?

१) प्राकृत २) शूरसेनी ३) अर्थमागधी ४) सर्वम्

ऊ. नहुषस्य पुत्रः कः?

१) ययातिः २) दुष्यन्तः ३) दूर्वासः ४) सुरराजः

ऋ. भारवेः ____ गौरवम्?

१) वंश २) कुल ३) अर्थ ४) धर्म

ॠ. नाटकस्य नायकः कः?

१) दुष्यन्तः २) महासेनः ३) दर्शकः ४) उदयन

लृ. ययातेः पत्नी का?

१) गौतमी २) ब्रह्मचारी ३) शर्मिष्ठा ४) प्रियंवदा

ए. शकुन्तलायाः पुत्रः कः?

१) महासेनः २) उदयनः ३) वसन्तकः ४) भरतः

ऐ. कविकुलगुरुः कः?

१) भारविः २) कालिदासः ३) भासः ४) न कोऽपि

ओ. प्रकृतिस्नेही का?

१) देवी २) अनसूया ३) गौतमी ४) शकुन्तला

औ. कश्यपस्य धनं किम्?

१) संयमः २) आश्रमम् ३) वनम् ४) तपः

**II. श्लोकानाम् अन्वय-अन्वयार्थ-तात्पर्यं च लिखत। 3×6=18**

2. दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव॥

अं. क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षरसः केनचित्।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै
र्दन्तान्याभरणानि तत्किसलयोर्भेदप्रतिद्वन्द्विभिः॥

अः पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः

सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥

क. ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव।

सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि॥

**III. सविस्तरेण लिखत ।** **2×10=20**

3. भारवेः देश-काल-कृतिम् अधिकृत्य लिखत।
4. शकुन्तलायाः पात्रपरिचयं कुरुत।
5. कण्वस्य सन्देशं वर्णयत।

**IV. परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

एकदा राजा विक्रमादित्यः योगिवेशं धृत्वा राज्यपर्यटनं कर्तुम् अगच्छत्। परिभ्रमन् स: एक नगरं प्राप्तवान्। तत्र नदीतटे एक: देवालयः आसीत्। तत्र नगरवासिनः पुराणकथां शृण्वन्ति स्म। तदानीम् एव एक वृद्धः स्वपुत्रेण सह नद्या: प्रवाहेण प्रवाहितः सः त्राहि माम् इति आकारितवान् किन्तु, तत्र उपस्थित-नगरजना: सविस्मयं तं वृद्धं पश्यन्ति। तस्य चीत्कार श्रुत्वाऽपि तयोः प्राणरक्षा कोऽपि न करोति। तदा नृपः विक्रमादित्यः नदीं प्रविश्य पुत्रेण सह तं वृद्धम् अतिप्रवाहात् आकृष्य तटम् आनीतवान्। स्वस्थो भूत्वा वृद्ध: विक्रमाय आशिषं दत्वा पुत्रेण सह स्वगृहं गतः। सत्यम् एव उक्तम्-“यस्तु क्रियावान् पुरुषः, सः विद्वान्।”

**प्रश्नाः** **5×2=10**

ख.) कः राज्यपर्यटनं कर्तुम् अगच्छत्?

ग.) के पुराणकथां श्रुण्वन्ति स्म?

घ.) वृद्धः किमर्थं त्राहि माम् इति आकारितवान्?

ङ.) विक्रमादित्यः किं कृतवान्?

च.) गद्यांशस्य शीर्षकं लिखत।